# NCERT Solutions Class 8 Sanskrit (Deepakam)

## Chapter 3 सुभाषितरसं पीत्वा जीवनं सफलं कुरु

### अभ्यासात् जायते सिद्धिः (पृष्ठ 32–35)

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

**(क) गीतानि के गायन्ति ?**

______________________

**उत्तराणि :** देवाः

**(ख) कः बल न वेत्ति ?**

______________________

**उत्तराणि :** निर्बलः

**(ग) कः वसन्तस्य गुणं वेत्ति ?**

______________________

**उत्तराणि :** पिकः

**(घ) मूषकः कस्य बलं न वेत्ति ?**

______________________

**उत्तराणि :** सिंहस्य

**(ङ) फलोद्गमैः के नम्राः भवन्ति ?**

______________________

**उत्तराणि :** तरवः

**(च) केन समं सख्यं न करणीयम् ?**

______________________

**उत्तराणि :** दुर्जनेन

**(छ) केन विना दैवं न सिध्यति ?**

______________________

**उत्तराणि :** पुरुषकारेण।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम्**
**उत्तराणि पूर्णवाक्येन लिखत-**

**(क) तरवः कदा नम्राः भवन्ति ?**

______________________

**उत्तराणि :** तरवः फलोद्गमैः नम्राः भवन्ति।

**(ख) समृद्धिभिः के अनुद्धताः भवन्ति ?**

______________________

**उत्तराणि :** समृद्धिभिः सज्जनाः अनुद्धताः भवन्ति ।

**(ग) सत्पुरुषाणां स्वभावः कीदृशः भवति ?**

______________________

**उत्तराणि :** सत्पुरुषाः स्वभावेन परोपकारिणः भवन्ति।

**(घ) सत्यम् कदा सत्यम् न भवति ?**

______________________

**उत्तराणि :** यत् छलम् अभ्युपैति तत् न सत्यम्।

**(ङ) दैवं कदा न सिध्यति ?**

______________________

**उत्तराणि :** दैवं पुरुषकारेण विना न सिध्यति ।

**३. स्तम्भयोः मेलनं कुरुत-**

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| गायन्ति देवाः किल गीतकानि | सत्पुरुषाणां स्वाभाविकी नम्रता |
| गुणी गुणं वेत्ति | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| भवन्ति नम्राः तरवः फलोद्गमैः | भारतभूमेः माहात्म्यवर्णनम् |
| यथा चतुर्भिः कनकं परीक्ष्यते | सज्जनः एव गुणानां मर्मज्ञः |
| अष्टौ गुणाः पुरुषं दीपयन्ति | प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| दुर्जनेन समं सख्यं न कारयेत् | केवलं दैवं प्रयत्नं विना असिद्धम् |
| एकेन चक्रेण न रथस्य गतिः | दुष्टसङ्गः उष्णाङ्गारसदृशः |

**उत्तराणि :**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| (क) | (ख) |
|---|---|
| गायन्ति देवाः किल गीतकानि | भारतभूमेः माहात्म्यवर्णनम् |
| गुणी गुणं वेत्ति | सज्जनः एव गुणानां मर्मज्ञः |
| भवन्ति नम्राः तरवः फलोद्गमैः | सत्पुरुषाणां स्वाभाविकी नम्रता |
| यथा चतुर्भिः कनकं परीक्ष्यते | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| अष्टौ गुणाः पुरुषं दीपयन्ति | प्रज्ञा, दमः, दानं कृतज्ञता इत्यादयः |
| दुष्टसङ्गः उष्णाङ्गारसदृशः | दुर्जनेन समं सख्यं न कारयेत् |
| एकेन चक्रेण न रथस्य गतिः | केवलं दैवं प्रयत्नं विना असिद्धम् |

**४. अधः प्रदत्तमञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

| |
|---|
| फलोद्गमैः, गुणं, कृतज्ञता, सिध्यति, श्रुतम्, शीलेन |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(क) गुणी ____________ वेत्ति न वेत्ति निर्गुणः।**
**उत्तराणि :** गुणम्

**(ख) भवन्ति नम्राः तरवः ____________।**
**उत्तराणि :** फलोद्गमैः

**(ग) पुरुषः परीक्ष्यते कुलेन, ____________ गुणेन, कर्मणा।**
**उत्तराणि :** शीलेन

**(घ) गुणाः पुरुषं दीपयन्ति प्रज्ञा, कौल्यं, दमः, ____________।**
**उत्तराणि :** श्रुतम्, दानम्, पराक्रमः

**(ङ) दानं यथाशक्ति ____________ च।**
**उत्तराणि :** कृतज्ञता

**(च) एवं पुरुषकारेण विना दैवं न**
**उत्तराणि :** सिध्यति

**५. समुचितं विकल्पं चिनुत-**

**(क) " गायन्ति देवाः किल गीतकानि " – इत्यस्य श्लोकस्य मुख्यविषयः कः ?**
(i) वसन्तस्य सौन्दर्यम्
(ii) भारतभूमेः गौरवम्
(iii) कर्मणा फलम्
(iv) दानस्य प्रभावः
**उत्तरम् :** (ii) भारतभूमेः गौरवम्

**(ख) "गुणी गुणं वेत्ति" – इत्यत्र कः गुणं न जानाति ?**
(i) गुणी:
(ii) निर्गुण:
(iii) पिक:
(iv) बली
**उत्तरम् :** (ii) निर्गुण:

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) "पिको वसन्तस्य गुणं न वायसः' – इत्यस्य तात्पर्यं किम्?**

(i) पिकः मधुरं गायति न वायसः

(ii) सुजन एव गुणं जानाति

(iii) वायसः अपि सरसं गानं करोति

(iv) वसन्तः निर्गुणः अस्ति

**उत्तरम् :** (i) पिकः मधुरं गायति न वायसः

**(घ) "भवन्ति नम्राः तरवः फलोद्गमैः " इत्यस्य अर्थः कः?**

(i) वृक्षाणां कठोरता

(ii) सत्पुरुषाणाम् उन्नतिः

(iii) फलयुक्ताः वृक्षाः नम्राः भवन्ति

(iv) परोपकारिणां दुर्बलता

**उत्तरम् :** (iii) फलयुक्ताः वृक्षाः नम्राः भवन्ति

**(ङ) "न सा सभा यत्र न सन्ति वृद्धाः " – इत्यत्र सभायाः महत्त्वं किम्?**

(i) सभा मनोरञ्जनाय भवति

(ii) सभा धनसम्पत्तिं प्रदातुं शक्नोति

(iii) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः

(iv) सभा केवलं राजकार्यार्थं भवति

**उत्तरम् :** (iii) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः

**(च) दुर्जनेन सह सख्यं किमर्थं न कार्यम् ?**

(i) सः मित्रं भवति

(ii) सः धनं ददाति

(iii) सः शिक्षां ददाति

(iv) सः उष्णाङ्गारवद् हानिकरः भवति

**उत्तरम् :** (iv) सः उष्णाङ्गारवद् हानिकरः भवति

**योग्यताविस्तारः**

- विष्णुपुराणम् – प्रसिद्धेषु अष्टादशसु पुराणेषु विष्णुपुराणम् अन्यतमम्। अस्मिन् पुराणे प्रायेण सप्तसहस्राधिकश्लोकाः सन्ति। अत्र भगवतः विष्णोः तस्य च अवताराणां विषये वर्णितम्। भारतवर्षस्य गौरवविषये विष्णुपुराणम् अतीव प्रामाणिकं तथ्यं प्रकाशयति।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

- महाभारतम् – संस्कृतसाहित्ये महाभारतम् इति इतिहासग्रन्थः पञ्चमवेदरूपेण स्वीकृतः। अस्मिन् ग्रन्थे लक्षाधिकाः श्लोकाः सन्ति। अतः शतसाहस्त्रीसंहिता इति अस्य अपरं नाम। महाभारते अष्टादश पर्वाणि सन्ति।
- भर्तृहरिः – भर्तृहरिः संस्कृतकाव्यवाङ्मये महान् कविः अस्ति। नीतिशास्रविशारदस्य तस्य कृतयः नीतिशतकं शृङ्गारशतकं वैराग्यशतकं चेति भारतीयज्ञानपरम्परां पोषयन्ति।
- हितोपदेशः – पण्डितनारायणेन हितोपदेशः कथाग्रन्थः सङ्कलितः। ग्रन्थेऽस्मिन् विविधाः कथाः नीतिश्लोकाः च सन्ति। हितोपदेशः चतुर्धा विभक्तः – मित्रलाभः, सुहृन्देदः, विग्रहः, सन्धिः।
- चाणक्यनीतिः – चाणक्यस्य नीतिश्लोकाः माणिक्यसदृशाः सन्ति। बालानां चरित्रनिर्माणाय आदर्शमानवजीवनप्रतिष्ठार्थं च आचार्यस्य चाणक्यस्य नीत्युपदेशाः अत्यन्तम् उपयोगिनः सन्ति।

**परियोजनाकार्यम्**

१. अन्तर्जालात् पुस्तकेभ्यश्च विंशतिसुभाषितानां सङ्ग्रहं कुरुत।
२. किमपि नीतिवाक्यम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।
३. पाठे आगतानि सुभाषितानि कण्ठस्थीकृत्य कक्षायां श्रावयत।

**अत्र इदम् अवधेयम्**

संस्कृतश्लोकेषु प्रतिपद्यं पादचतुष्टयम् अस्ति । छन्दोबद्ध- सस्वरगानशैली अपि अस्ति । श्लोकेषु सन्धिसमासयुक्तपदानि भवन्ति ।

सरलार्थ – संस्कृत श्लोकों में प्रत्येक पद्य के चार चरण होते हैं। छन्दोबद्ध सस्वर गान शैली भी है। श्लोकों में सन्धि समास युक्त पद होते हैं। यथा-

- नम्रास्तरवः = नम्राः + तरवः ।
- अभ्युपैति अभि + उप + एति ।
- अनुद्धताः = न उद्धताः (नञ् तत्पुरुषसमासः)।
- यथाशक्ति = शक्तिम् अनतिक्रम्य (अव्ययीभावः) ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in